# Natya Shastra Chapter 36

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૩૬ નાટ્યશાપઃ

## Document Information

Text title : naaTyashaastra adhyaaya 36 naaTyashaapaH

File name : natya36.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : Sowmya Krishnapur krsowmya at yahoo.com

Proofread by : Sowmya Krishnapur krsowmya at yahoo.com are needed for devanaagarii output and formatting.

Latest update : January 16, 2007

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૩૬ નાટ્યશાપઃ

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ ષટ્ત્રિંશોઽધ્યાયઃ

અથાત્રેયો વસિષ્ઠશ્ચ પુલસ્ત્યઃ પુલહઃ ક્રતુઃ ।
અઙ્ગિરા ગૌતમોઽગસ્ત્યો મનુરાયુસ્તથાત્મવાન્ ॥ ૧॥

વિશ્વામિત્રઃ સ્થૂલશિરાઃ સંવર્તઃ પ્રમતિર્દનુઃ ।
ઉશના બૃહસ્પતિર્વ્યાસશ્ચ્યવનઃ કાશ્યપો ધ્રુવઃ ॥ ૨॥

દુર્વાસા જામદગ્ન્યશ્ચ માર્કણ્ડેયોઽથ ગાલવઃ ।
ભરદ્વાજશ્ચ રૈભ્યશ્ચ યવક્રીતસ્તથૈવ ચ ॥ ૩॥

સ્થૂલાક્ષઃ શકલાક્ષશ્ચ કાણ્વો મેધાતિથિઃ ક્રતુઃ ।
નારદઃ પર્વતશ્ચૈવ સુવર્માથૈકજો દ્વિજઃ ॥ ૪॥

નિતમ્બુર્ભુવનઃ સૌમ્યઃ શતાનન્દઃ કૃતવ્રણઃ ।
જામદગ્ન્યસ્તથા રામઃ કચશ્ચેત્યેવમાદયઃ ॥ ૫॥

એવં તે મુનયઃ શ્રુત્વા સર્વજ્ઞં ભરતં તતઃ ।
પુનરૂચુરિદં વાક્યં કુતૂહલપુરોગમમ્ ॥ ૬॥

યસ્ત્વયા ગદિતો હ્યેષ નાટ્યવેદઃ પુરાતનઃ ।
એકચિત્તૈઃ સ ચાસ્માભિઃ સમ્યક્ સમુપધારિતઃ ॥ ૭॥

એકશ્ચ સંશયોઽસ્માકં તં નો વ્યાખ્યાતુમર્હસિ ।
કો વાન્યો નાટ્યવેદસ્ય નિશ્ચયં વક્તુમર્હતિ ॥ ૮॥

ન વયં પરિહાસેન ન વિરોધેન ન ચેર્ષ્યયા ।
પૃચ્છામો ભગવન્ નાટ્યમુપદેશાર્થમેવ તુ ॥ ૯॥

અસ્માભિશ્ચ તદા નોક્તં કથાચ્છેદો ભવેદિતિ ।

ઇદાનીં તૂપશિક્ષાર્થં નાટ્યગુહ્યં નિદર્શય ॥ ૧૦॥

લોકસ્ય ચરિતં નાટ્યમિત્યવોચસ્ત્વમીદૃશમ્ ।
તેષાં તુ લોકં ગુહ્યાનાં નિશ્ચયં વક્તુમર્હસિ ॥ ૧૧॥

દેવસ્ય કસ્ય ચરિતં પૂર્વરઙ્ગે દ્વિજર્ષભ ।
કિમર્થં ભુજ્યતે હ્યેષ પ્રયુક્તઃ કિં કરોતિ વા ॥ ૧૨॥

કસ્માચ્ચૈવ પુનઃ શૌચં સમ્યક્ ચરતિ સૂત્રદૃક્ ।
કથમુર્વીતલે નાટ્યં સ્વર્ગાન્નિપતિતં વિભો ॥ ૧૩॥

કથં તવાયં વંશશ્ચ નટસંજ્ઞઃ પ્રતિષ્ઠિતઃ ।
સર્વમેવ યથાતત્ત્વં કથયસ્વ મહામુને ॥ ૧૪॥

તેષં તુ વચનં શ્રુત્વા મુનીનાં ભરતો મુનિઃ ।
પ્રત્યુવાચ પુનર્વાક્યં ગુહ્યાર્થાભિનયં પ્રતિ ॥ ૧૫॥

બ્રવીમિ વઃ કથાં ગુહ્યાં યન્માં પૃચ્છન્ સુવ્રતાઃ ।
પૂર્વરઙ્ગવિધાનસ્ય તાં ચ મે સન્નિબોધત ॥ ૧૬॥

પ્રોક્તવાનસ્મિ યત્પૂર્વં શુભં વિઘ્નનિબર્હણમ્ ।
તસ્યાનુબન્ધેન મયા પૂર્વરઙ્ગઃ પ્રકીર્તિતઃ ॥ ૧૭॥

શસ્ત્રાણાં પ્રતિકારાર્થં શરીરાવરણં યથા ।
ક્રિયતે હિ તથા પાપં હુતેનૈવ પ્રશામ્યતિ ॥ ૧૮॥

એવં જપ્યૈશ્ચ હોમૈશ્ચ દેવતાભ્યર્ચનેન ચ ।
સર્વાતોદ્યવિધાનૈશ્ચ તથા ગીતસ્વનેન ચ ॥ ૧૯॥

સ્તુત્યાશીર્વચનૈઃ શાન્તૈઃ કર્મભાવાનુકીર્તનૈઃ ।
મયા પાપાપહરણૈઃ કૃતે વિઘ્નનિબર્હણે ॥ ૨૦॥

સ્તુતિગીતાદિસંસૃષ્ટૈર્દેવૈરભિહિતોઽસ્મ્યહમ્ ।
નિતરાં પરિતુષ્ટાઃ સ્મઃ પ્રયોગેણામુના ચ તે ॥ ૨૧॥

દેવતાસુરમાનન્દ્ય યસ્માઁલ્લોકશ્ચ નન્દતિ ।
તસ્માદયં પ્રયોગસ્તુ નાન્દીનામા ભવિષ્યતિ ॥ ૨૨॥

ગીતવાદ્યાનુનાદો હિ યત્ર કાકુસ્વનઃ શુભઃ ।
તસ્મિન્ દેશે વિપાપ્માનો માઙ્ગલ્યં ચ ભવિષ્યતિ ॥ ૨૩॥

યાવત્તં પૂરયેદ્દેશં ધ્વનિર્નાટ્યસમાશ્રયઃ ।
ન સ્થાસ્યન્તિ હિ રક્ષાંસિ તં દેશં ન વિનાયકાઃ ॥ ૨૪॥

આવાહે ચ વિવાહે ચ યજ્ઞે નૃપતિમઙ્ગલે ।
નાન્દીશબ્દમુપશ્રુત્ય હિંસ્રા નશ્યન્તિ ચૈવ હિ ॥ ૨૫॥

પાઠ્યં નાટ્યં તથા ગેયં ચિત્રવાદિત્રમેવ ચ ।
વેદમન્ત્રાર્થવચનૈઃ સમં હ્યેતદ્ ભવિષ્યતિ ॥ ૨૬॥

શ્રુતં મયા દેવદેવાત્ તત્ત્વતઃ શઙ્કરાદ્ધિતમ્ ।
સ્નાનજપ્યસહસ્રેભ્યઃ પવિત્રં ગીતવાદિતમ્ ॥ ૨૭॥

યસ્મિન્નાતોદ્યનાટ્યસ્ય ગીતપાઠ્યધ્વનિઃ શુભઃ ।
ભવિષ્યત્યશુભં દેશે નૈવ તસ્મિન્ કદાચન ॥ ૨૮॥

એવં પૂજાધિકારાર્થં પૂર્વરઙ્ગઃ કૃતો મયા ।
નાનાસ્તુતિકૃતૈર્વાક્યૈર્દૈવતાભ્યર્ચનેન ચ ॥ ૨૯॥

યતોઽભિવાદનં ક્લિષ્ટં શિષ્ટં તદ્રઙ્ગમણ્ડલે ।
તતસ્તસ્ય હિ તચ્છૌચં વિહિતં તુ દ્વિજોત્તમાઃ ॥ ૩૦॥

શૌચં કૃત્વા યતો મન્ત્રં પૂજનં જર્જરસ્ય તુ ।
ઉચ્યતે પૂર્વરઙ્ગેઽસ્મિન્ તસ્માચ્છૌચં પ્રકીર્તિતમ્ ॥ ૩૧॥

યથાવતારિતં ચૈવ નાટ્યમેતન્મહીતલે ।
વક્તવ્યં સર્વમેતદ્ધિ ન શક્યં હિ નિગૂહિતુમ્ ॥ ૩૨॥

મમૈતે તનયાઃ સર્વે નાટ્યવેદસમન્વિતાઃ ।
સર્વલોકં પ્રહસનૈઃ બાધન્તે નાટ્યસંશ્રયૈઃ ॥ ૩૩॥

કસ્યચિત્ત્વથ કાલસ્ય શિલ્પકં ગ્રામ્યધર્મકમ્ ।
ઋષીણાં વ્યઙ્ગ્યકરણં કુર્વદ્ભિર્ગુણસંશ્રયમ્ ॥ ૩૪॥

અશ્રાવ્યં તદ્દુરાચારં ગ્રામ્યધર્મપ્રવર્તિતમ્ ।
નિષ્ઠુરં ચાપ્રસ્તુતં ચ કાવ્યં સંસદિ યોજિતમ્ ॥ ૩૫॥

તચ્છ્રુત્વા મુનયઃ સર્વે ભીમરોષપ્રકમ્પિતાઃ ।
ઊચુસ્તાન્ ભરતાન્ ક્રુદ્ધા નિર્દહન્ત ઇવાગ્નયઃ ॥ ૩૬॥

મા તાવદ્ભો દ્વિજા યુક્તમિદમસ્મદ્વિડમ્બનમ્ ।
કો નામાયં પરિભવઃ કિઞ્ચ નાસ્માસુ સમ્મતમ્ ॥ ૩૭॥

યસ્માજ્જ્ઞાનમદોન્મત્તા ન વેત્થાવિનયાશ્રિતાઃ ।
તસ્માદેતદ્ધિ ભવતાં કુજ્ઞાનં નાશમેષ્યતિ ॥ ૩૮॥

ઋષીણાં બ્રાહ્મણાનાં ચ સમવાયસમાગતાઃ ।
નિરાહુતા વિના હોમૈઃ શૂદ્રાચારા ભવિષ્યથ ॥ ૩૯॥

અપાઙ્ક્તેયાઃ કુત્સિતાશ્ચાવમા એવ ભવિષ્યથ ।
યશ્ચ વો ભવિતા વંશઃ સર્વાશૌચો ભવિષ્યતિ ॥ ૪૦॥

યે ચ વો વંશજાસ્તેઽપિ ભવિષ્યન્ત્યથ નર્તકાઃ ।
પરોપસ્થાનવન્તશ્ચ શસ્ત્રપણ્યોપજીવિનઃ ॥ ૪૧॥

શાપં દત્તં તથા જ્ઞાત્વા સુતેભ્યો મે તદા સુરાઃ ।
સર્વે વિમનસો ભૂત્વા તાનૃષીન્ સમુપસ્થિતાઃ ॥ ૪૨॥

યાચમાનૈસ્તતઃ પ્રોક્તં દેવૈઃ શક્રપુરોગમૈઃ ।
ઇદાનીં દુઃખમુત્પન્નં નાટ્યમેતદ્ વિનઙ્ક્ષ્યતિ ॥ ૪૩॥

ઋષિભિશ્ચ તતઃ પ્રોક્તં ન ચૈતદ્ધિ વિનક્ષ્યતિ ।
શેષમન્યત્ર યદ્ પ્રોક્તં સર્વમેતદ્ ભવિષ્યતિ ॥ ૪૪॥

એતચ્છ્રુત્વા તુ વચનં મુનીનામુગ્રતેજસામ્ ।
વિષણ્ણાસ્તે તતઃ સર્વે શ્રુત્વા માં સમુપસ્થિતાઃ ॥ ૪૫॥

પ્રોક્તવન્તશ્ચ માં પુત્રાસ્ત્વયાહો નાશિતા વયમ્ ।
અનેન નાટ્યદોષેણ શૂદ્રાચારા હિ યત્ કૃતાઃ ॥ ૪૬॥

મયાપિ સાન્ત્વયિત્વોક્તા મા ક્રોધં વ્રજતાનઘાઃ ।
કૃતાન્તવિહિતોઽસ્માકં નૂનમેષ વિધિઃ સુતાઃ ॥ ૪૭॥

મુનીનાં હિ મૃષા વાક્યં ભવિષ્યતિ કદાચન ।
નિધને ચ મનો મા ભૂદ્ યુષ્માકમિતિ સાન્ત્વિતાઃ ॥ ૪૮॥

જાનીધ્વં તત્તથા નાટ્યં બ્રહ્મણા સમ્પ્રવર્તિતમ્ ।
શિષ્યેભ્યશ્ચ તદન્યેભ્યઃ પ્રયચ્છામઃ પ્રયોગતઃ ॥ ૪૯॥

મા વૈ પ્રણશ્યતામેતન્નાટ્યં દુઃખપ્રવર્તિતમ્ ।
મહાશ્રયં મહાપુણ્યં વેદાઙ્ગોપાઙ્ગસમ્ભવમ્ ॥ ૫૦॥

અપ્સરોભ્ય ઇદં ચૈવ યથાતત્ત્વં યથાશ્રુતમ્ ।

નાટ્યં દત્ત્વા તતઃ સર્વે પ્રાયશ્ચિત્તં ચરિષ્યથ ॥ ૫૧॥

। ઇતિ ભરતીયે નાટ્યશાસ્ત્રે નાટ્યશાપો નામ ષટ્ત્રિંશોઽધ્યાયઃ ।

Encoded by Sowmya Krishnapur krsowmya@yahoo at com

---

*Natya Shastra Chapter 36*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*